
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

श्रीरामचन्द्र:॥ श्री श्री श्री श्री श्री सर्वज्ञेभ्यो नमः॥ श्रीगणेशाय नमः॥

Accession No:- ~~10858 59.~~ M 919

Title:- ~~1) ज्योतिष ग्रंथ~~ कारकचक्रवृत्ती संपूर्ण

~~2) पद्यस्वरनिर्णय~~

Author:- 2 भवानंदमिश्र

Subject:- ज्योतिष

Date:- ~~शा. 1736.~~

पत्रे:- (27)

1

श्रीनृसिंहं भजे ॥

श्रीगणेशाय नमः ॥ अथ कारकप्रक्रिया तत्र षड्विधम्ः। कर्त्ता कर्म च करणं च संप्रदानं तथैव च ॥ अपादानाधिकरणमित्याहुः कारकाणि षट् ॥ तत्र कर्त्ता द्विविधः ॥ स्वतंत्रः प्रयोजकश्चेति यः स्वयं करोति स स्वतंत्रः। यः अनेन कारयति सः प्रयोजकः। तत्रापि प्रत्येकं उक्तानुक्तभेदेन द्विविधं। उक्ते कर्त्तरि प्रथमा अनुक्ते तृतीया षष्ठ्यौ। एवं उक्ते कर्मणि प्रथमा अनुक्ते कर्मणि द्वितीया षष्ठ्यौ ॥ तत्र कर्म चतुर्विधं। उत्पाद्यं प्राप्यं संस्कार्यं विकार्यं। यदभूत्वा भावि तदुत्पाद्यं यत्सिद्धमेव प्राप्यते तत्प्राप्यं यत्र गुणाभिधानं मलापकर्षो वा क्रियते तत्संस्कार्यं यत्र पूर्वाय·

१

का० द०॥

स्यापरित्यागः अवस्थान्तरप्राप्तिः। क्रियते तेनेति कार्यं करणं द्विविधं उक्तं अनुक्तं उक्ते करणे प्रथमा
अनुक्ते करणे तृतीया षष्ठ्यौ ॥ तत्र करणं द्विविधं बाह्यं आभ्यन्तरं च शारीराद्भिन्नं तं बाह्यं द
दात्रादि आभ्यन्तरं शरीरावयवं दन्तनखादि क्रियासिद्धौ प्रकृष्टोपकारकं करणम् ॥ संप्रदानं द्विवि
धं उक्तमनिष्टं च ॥ क्रियासाधनहेतुभूतं इष्टं तद्भिन्नमनिष्टं तच्च संप्रदानं उक्तं अनुक्तं वा उक्ते
संप्रदाने प्रथमा अनुक्ते संप्रदाने चतुर्थी षष्ठ्यौ अपादानं द्विविधं उक्तमनुक्तं च उक्ते अपादाने
प्रथमा अनुक्ते अपादाने पंचमी षष्ठ्यौ पुनरपादानं द्विविधं विश्लेषावधिकं चरं स्थिरञ्चा
क्रियासाधनहेतुघटकम् अपादानम् ॥ विशेष्यविशेषणरूपोपस्थितयोः सम्बन्धः तत्र क्रिया

रात•

श्रीः

टीकेहेमजे

प २ थ ७ प

नीयत्वं विशेषणत्वं तदेव प्रधानं तत्र प्र[illegible]माद्यास्सप्तमन्ता विभक्तयो यथायथं सुः विशेष्य
मप्रधानं तत्र षष्ठि क्रियासाधन हेतु निमित्तं अधिकरणत्वं तत्त्व षड्विधं औपश्लेषि
कं सामीपिकं वैषयिकं अभिव्यापकं नैमित्तिकं औपचारिकं पुनरधिकरणं द्विविधं
उक्तमनुक्तं वा उक्ते अधिकरणे प्र[illegible]मा अनुक्ते अधिकरणे सप्तमीषष्ठ्यो· अर्थेयां · १
क्रियामूलत्वात् धातुसंबंधः तत्र धातोः सप्तविंशतिर्भेदाः परस्मैपदी· आत्मनेपदी
उभयपदी सेट् अनिट् वेट् अकर्म्मकः सकर्म्मकः द्विकर्म्मकः एवंतु योनिः शब्दः चतुर

२

धा १

२

विधः [illegible] संज्ञाशब्दः क्रियाशब्दः गुणशब्दः जातिशब्दः संज्ञाशब्दो यथा डित्थक
पित्थादिः क्रियाशब्दो यथा वाचकवाचकादिः गुणशब्दो यथा कृष्णशुक्लादिः जा
तिशब्दो यथा ब्राह्मणक्षत्रियादिः पुनः चतुर्विधः रूढिः यौगिकः योगरूढिः योगी
करूढिः अस्मात् [illegible] दयसमर्थैर्वा व्यक्या इति रूढिः क्रियागुणसंबंधो योगस्तत्र भवो यौ
गिकः क्रियातः पक्तृ पाचकादयः गुणतो नीलकण्ठादयः संबंधे भूभृतादयः पूर्वपदपदप
रपदत्तानियोगरूढिः पूर्वपदपरावर्तनं यथा भूपतिः महीपतिः क्ष्मापतिर्नृप इत्यादिः परप

ग॰ व॰ ३ तो॰ २

दपरावर्त्तनं यथा· पंकजं पंकेरुहं पंकजातं पंकभवं पद्मं इत्यादि॥ परपदपरावर्त्तनं च नवह
तीति योगिकरूढिर्यथा गीर्वाणा देवाः पद्मानन तथा वारुरुह इत्यादि॥ अथैषां प्रत्ययार्थेन स
हविभक्त्यर्थो निरूप्यते· तत्र अस्तिभवतीत्यादिक्रियासाहित्येन प्रथमार्थो निरुप्यते॥
तत्र लिंगार्थप्रथामा नियोतोपस्थितकोनामार्थः पञ्चविधः एकं द्विकं त्रिकं चाथ चातुष्कं
पंचकं तथा नामार्थ इति सर्वे मीपद्वीसास्त्रे निरूपिता अस्यार्थः॥ एकं जातिः जातिर्मित्यस्य
शब्दोऽर्थप्रवर्त्तते सैव जातिः द्विकं जातिर्व्यक्तिश्च तत्र जातेरसाक्षात् व्यक्तिद्वारा तद
र्थोपस्थितिः ज्ञातार्थप्रतिपादिका व्यक्तिः त्रिकं जातिव्यक्तिः लिंगानि तत्र भाष्यात्कर्त्तनके

शर्वाणिं नारीं लोमशः प्रवसन्तः। इत्यादिः। किंच। आम्नायस्यातीन्द्रियत्वात्। नस्त्रित्वादिकं
कश्चित्। उपदेशोयं गणरत्नमहोदधावागमेन तथाचकस्थं जानियन्ति लिंग [illegible] संख्या। मा
नोन्मानपरिमाणप्रमाणानि चतुर्विधा संख्या। मानेयथा सेरकादिः। उन्मानेयथा पाद्या
दिः। परिमाणेयथा द्रोणो व्रीहिः। द्रोणौ परिमाणमेषां द्रोणा व्रीहिरित्यर्थः॥ तदुक्तं च। अष्टमु
ष्टि भवेत्कुंचि कुंचि चत्वार पुष्कलं। चतुःपुष्कलं भवेद्रोणः खारिद्रोणचतुष्टयम्॥ प्रमा
णेयथा एकत्वादिः। पराद्धान्ताः पंचकं जानियन्ति लिंगसंख्या कारकाणि। सर्वं मुक्तेयथा

पथा८

राम ६

श्री.

वे ८ नि ३ अ ५ था १

श्रीनृसिंहं भजे. ४ स्था १

ल्लषणाः नित्यं रूपवत्तयोरायम नियतलिंगोय यथा पितवांपि भगवानिवासुदेवे नियतपुंलिंग एवेति
भावः लिंगंच अर्थश्चेति लिंगार्थः तस्मिन लिंगार्थे तेन षट्कारकेभ्यः क्षुन्नंवस्तु सन्मा
त्रेतस्मिन् सन्मात्रे नियत लिंगे प्रथमा यथा तटः तटी तटं उच्चैः नीचैः अलिंगेय थाक्र
ल्मर विरिं माद्भिः र विलिंगार्थे प्रथमा उपमार्थे इवेति साश्यं परायेत्निका त्तो लिंगार्थे प्रथमा.
उपमेऽस्यार्थे राज्ञवत्ते क्रियापदं कर्मकः उभयपदी सेट् धातुः राज्यादि प्रोक्त दुष्टं लज्जास
त्ता स्थिति जागर रात्र्युद्धि दीप्य भय जीव तिमरणं शयन क्रीडारुचि दीप्त्यर्थे धातुगणः

४

स्था १

अन्ययोंतसेटः तुटि: + ३

त्तमकर्म्मकमाहुः स्वरितेतश्चजर्देशस्वरानुबंधिंजकारानुबंधिंच ऽमयपदी उभ्भरितपारि
धं सिनोऽनुबंधाः ॥ जकारान्तेषु एकस्वरेषु त्यज्‌ यज्‌ भज्‌ तज्‌ संज भञ्ज्‌ भुंज्‌ स्वञ्ज्‌ सृज्‌
विज्‌ रंज्‌ निज्‌ सिज्‌ मज्‌ भंज्‌ भञ्ज्‌: षोडश अनिट्‌: कुमारीरोनूपजते ॥ अजिशयुनरोंजि
पुनः पुनर्वाऽस्यर्थः कुजः रोषात्क्रोधादित्यर्थः कुमारीणीं लिंगार्थप्रथमाकर्तृपदंरोषादिति हे
तोः पंचमिरोन्नूपजतेइति त्रिसापदम्‌ धातोः सकर्मकस्यकर्म्मणोऽविव[illegible]: अकर्म्मकत्वं त
दुक्तं धातोरर्थांतरेवृत्तेर्धात्वर्थेनोपसंग्रहात्‌ प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्म्मिका क्रिया
इति नूशद्ध सकर्म्मकः परस्मैपदी अनुदात्तङित्‌ ञितिस्वरितेतः भिन्नः सेट्‌ नूषण्यन्नु उणु

साति३

श्रो०

क्ष्म १

ष·राफ·ष्फ·रूस्वोकारान्तेभ्यः एकस्त्वेऽभ्यः [illegible] मिस प्रसेष्ट्र॥ अन्ये उकारान्ता अनिष्टाः नृपालः
भवंबोभुज्यते· अतिशयेन भुनक्तीत्यर्थः भूपालइति कर्तृपदं लिंगार्थे प्रथमा भुयंइति कर्मपदं
आप्यं कर्मवो भुज्यतेइति क्रियापदं भुज पालनाभ्यवहारयोः उभयपदी स्वौ तेनात्मकर्म
कः अनीष्टरामल [illegible] रोऽपाकपूर्व आसाय भुवक्तरी त्यर्थः असमुखि भूः सजातान्स्व कर्मकः सेट्
१५ पस्मैपदी स [illegible] कारान्तो व वस ल अदनेवस निवासे अनिष्टः अन्ये सान्ताः सेट् रामस्वचलक्ष्मण
श्च राम लक्ष्मणोपदार्थ नाववृद्धे दकभेदे द्वन्द्वः कर्तृपदं लिंगार्थे प्रथमा ॥ सन्तः परोपकार
रसिकाः कियन्तः लोके विरलाः सन्ति वर्तन्ते इत्यर्थः संतः कर्तृपदं लिंगार्थे प्रथमा कियन्तः

५

श्री०

१२ ते५ अ५ १२ १४

इविशेषणम्ः समानविभक्तिकत्वं च विशेषणत्वं सन्निहितं क्रियापदं ॥ असमुविअ कन्ति
कः सेट् परस्मैपदी कुमाराः स्वैरं स्वच्छन्दं यथा स्यात्तथा स्वपन्तीत्यर्थः कुमाराः कर्तृपदं लिंगार्थे प्रथमा स्वैरमि
त्यव्ययं सर्वत्र क्रियापदं शीङ् स्वप्ने आत्मनेपदी ङित् अकर्मकः से इकारान्तेषु शी ङ् स्वि ॥
ङि ड्भ्विमसेटः अन्ये इकारान्तास्त्वनिटः नाकाः नैकयाम्सिनो जिघ्यारोन्नूपते अतिशयि
नस्त्रुवं जित्यर्थः च तिवाक्योर्थ्येप्र नारकाः कर्तृपदं लिंगार्थे प्रथमा नोन्नूपते क्रियापदं नू शैं
सेट् परस्मैपदी गीतज्ञाः गानरसिकाः जेगीयन्ते अतिशयेन गायन्तीत्यर्थः गीतज्ञाः कर्तृ
पदं लिंगार्थे प्रथमा जेगीयन्ते क्रियापदं गै शब्दे परस्मैपदी कर्मणः अविवक्षितत्वात् अकर्मकत्वं अनि

क्र १९ मे ०

ठे३

राम

6

द॰ ए ए ज्ञो ज्ञोस न्भदनगोस न्भदना अनिट्॰ चोजिकैमालंकारे अव्ययं॰ मज्ञार्जितः दीर्घ रो
गीनेश्रीयन्ते अजिशयेन ग्नियंते इत्यर्थः ॰ज्ञा जिजाः कर्तृपदं लिंगार्थे प्रथमा॰ मेग्नियंते क्रिया
पदं॰ ग्न कृ प्राणत्यागे धातुः आत्मनेपदी॰ डि॰ त्वात्॰ अनिट् अकर्मक अविवक्षितत्वात्॥ आ
मंत्रणे च अस्यार्थः लिंगार्थे प्रथमा इत्यतः प्रथमेत्यनुवर्त्य व्याख्यायेते॰ आमंत्रणे संबोधने संप्रत्यची
क्रत्यबोध्यते आहूयते इति संबोधनं तत्र संबोधने अर्थे प्रथमा विभक्ति र्भवति चकार उक्तार्थनि
श्चायकः यथोदाहरति॰ हे गोविन्द त्वं सर्वज्ञ असि॰ गोविंदेति कर्तृपदं संबोधने प्रथमा॰ मामिति
कर्मपदं॰ समुद्धरेति क्रियापदं॰ समुपसर्ग॰ उदुपसर्ग श्च॰ धृञ् धारणे धातुः उभयपदी अ
निट्॰ सकर्मकः सर्वाणि संबोधनपदानि मध्यमपदयोजकानि॰ वक्तानुक्रमभेदेन प्रथमान्त

रागगत्यवसादनेषु धातुः परस्मैपदी अनिट् अकर्मकः दकारान्तेषु पंचदशमः अनिट् ... रामः

श्री॰

न्त नियान्त युष्मत्कर्तृकानि हे परमेश्वर त्वं प्रसीद नमो परिसन्नो भव परमेश्वरे जि कन्त पदं संबो
धने प्रथमा प्रसिद्धे जि क्रियापदं प्रपूर्वकः बहु विशा[illegible] हरि पुरी बोत्संज्ञे स्कां दिग जिसो
षरागया: ॥ भिदिर विदारणे छिदिर् द्वैधीकरणे त्वदिर संप्रेषणे शद्लृ विसरण गत्यवसाद
ने जिक्ष्विदा गात्रप्रक्षरणे पद गतौ खिद दैन्ये णुद प्रेरणे व्यथने च विद संज्ञायां ॥ षिदवि
चारणे इत्यादि अन्ये नासेट् हे कुमारो युवां स्वैरं स्वेच्छया आसाथां तिष्ठतमित्यर्थः कुरौ कत्त पदं
संबोधने प्रथमा स्वैरं अव्ययम् आसाथां क्रियापदम् आसु उपवेशने धातुः आत्मनेपदी अ
कर्मकः सेट् भोत्तपस्विनः यूयं छम मध्यम भोतपस्विनः कत्त पदं संबोधने प्रथमा त्वम ध्वं

दं

१॥ तने॰ ॥ ५

7

रसिंहभक्त॰

प्र४ नं३ प्र१४

क्रियापदं॰ त्वमूषस हनेधातु॰ आत्मनेपदीवेट्॰ अकर्मकः त्वमांकुरु त इत्यर्थे था [illegible] त्त्वर्थेनोप
संगच्छन्ते॰ ननु संबोधनद्योतकं हे पदं त्वया क्वा भोत्तपस्विन इति कमुच्यते॰ तत्राह॰ भो इति प्र
यमा बहुवचनान्तं पदमेकं सुत्रं अस्यार्थः भवं भगवन्॰ अघ्वयोः स्थाने संबोधनविषये संबोध
नार्थद्योतका हे श[illegible]सहितपथाक्रमं॰ भोस भगोस अघोस एतेस[illegible] निपात्यन्ते॰ क्रियानि
वृत्तिः सिद्धो व्याकरणं निपातः तत्र पूर्वोदाहृते हे पदं द्योतकं भो इति स्मृता नानुकरणं आप्त
निपातप्रतिरूपक[illegible]यम॰ जद्युक्त पाट्प्याट् अंगहे है भो अयि रे संबोधनार्थकाः॥ एतेन पूर्वोक्तं
सूक्ष्यं॰ अथेदानीं प्रकृतमनुसरामः त्वमस्वेत्यादिः भो दुराधर्ष त्वं क्षमस्व भव तो क्षांत्याज

प्र२

श्री॰

गतिसोभाग्यवतीतिप्रार्थना॰ दुग्धेतिकर्तृपदं संबोधने प्रथमा॰ स्मस्वेतिक्रियापदं॰ स
मूलस्य लुनेधातुः आत्मनेपदीवेट्॰ अकर्मकः नगोहे भगवन्तुभ्यंतेनमोऽस्तुत्व
भिविषयेनमस्कारप्रार्थना नगोकर्तृपदं॰ संबोधनेप्रथमा अस्तुक्रियापदं॰ नमोन
नौ अव्ययम्॰ नमोयोगेतुभ्यंचतुर्थी अनन्यादेशे अनेकवारोक्तौते आदेशः तुभ्यंस्था
नेवैकल्पिकः अंन्वादेशवेतिभाष्यवार्तिकात्॰ असभुविधातुः परस्मैपदी अकर्मकः
सेट्भोमल्लप्राज्ञत्वं अधीष्व अध्ययनंकुरुमल्लप्राज्ञेतिकर्तृपदं॰ संबोधनेप्रथमाभो
सः इत्यनेनविसर्गलोपः अधिष्वेतिक्रियापदं॰ इङ् अध्ययनेधातुः आत्मनेपदी॰ अ

सि॰ ३

रामेति॰

४

निहू॰ अकर्मकः धात्वर्थेनोपसंग्रहात्· अधिपूर्वः इङ्‌ कायधुपसर्गेणो नव्यभिचरतः इति
भाष्यम्· [illegible] हे अ[illegible] वन् पापिन् त्वव्वस्मारं निजेकृतं पापं त्वं [illegible] जय दुर्गेऽत्तु· आ वोऽजि कत्प
दं· संबोधने प्रथमा· त्वव्वस्मारं कर्मपदं· वाजये जित्क्रियापदं हन्नहीं सागत्योः धातुः सकर्मकः
अनिहृद्वस्मारं पापमत्रिस्याद्भिजि दुर्गसिंहः वस्मारं स्वपं हनिजत्वं प्रेरय त्वस्मारं त्वं वाजय
इति प्रथमा· अथातो द्वितीयायाः प्रदर्शनं तेशेषाद् इति प्रथमाबहुवचनान्तम्· कार्ये स
प्तम्येकवचनान्तं तत्र द्वितीयाकन्तशाधयोः सप्तमी द्विवचनान्तं तत्र त्राणायाम पात्रे सप्तमे
कवचनान्तं तत्र चतुर्थी विश्लेषावधौ सप्तम्येकवचनान्तं तत्र पंचमी संबंधे सप्त

ष्येकवचनान्तं तत्र षष्ठि आधार भावयोः सप्तमि वचनं तत्र स[illegible]मी अनेकपदावच्छिन्नं
सूत्रं अस्यार्थः उक्तास्याः शेषाः द्वितीयाद्याः सप्तमीपर्यन्ताः षड् भक्तयो यथाक्रमं एव
वेभुकार्याद्यर्थेषु भवन्ति तत्र कार्ये कर्मकारके द्वितीया कर्मकारकं चतुर्विधं उत्पाद्यं
आप्यं संस्कार्य्यं विकार्य्यं च यद्भूत्वा भावि तदुत्पाद्यं यत्सिद्धमेव प्राप्यते तदाप्यं यत्र गुणाभि
धानं मलापकर्षो वा क्रियते तत्संस्कार्य्यं यत्र पूर्वावस्थापरित्यागेनान्यावस्थांतरं प्राप्नोति
तद्विकार्य्यं क्रमेण दर्शयति कान्तुकः कटं करोति अत्र किंचित्कृतं किंचित्क्रियमाणं अतः उत्पाद्यं
कर्म कान्तुकः कर्ता कटं कर्म करोति क्रियाडुकृञ्करणे धातुः उभयपदी अनीट् सकर्मकः ॥

कृष्णा॰ ८

चाक्षुषः निष्पद्यमानस्य कर्तृस्य रूपं स्तौति अत्र सिद्धमेव रूपं अतः आप्यं कर्म॰ चाक्षुषः

कर्ता॰ रूपं कर्म॰ पश्य ति क्रिया॰ दृशिर् प्रेक्षणे धातुः प्रेक्षणं दर्शनं दर्शनं द्विधं चाक्षुषं दर्शनं अ

चाक्षुषदर्शनं च॰ ई द्विपा मनोबुद्धि गोचरं ज्ञान गो चरं वा चाक्षुष दर्शनं केवलं नेत्र गो

चरं चाक्षुषदर्शनं॰ परस्मै पदी॰ अ निट् सकर्मकः सान्नेष्टुट् शिर प्रेक्षणे॰ दिशा अतिसर्जने

दंशा दंशने॰ मशा आमर्शने॰ स्पृशा संस्पर्शने॰ रिशा तु शा हिंसायां क्रुशा आह्वाने रोदने च

विशा प्रवेशने॰ लिशा अल्पीभावे॰ दृशा अनीट् अन्ये शान्ता

सेटः धनिष्ठः राज्यं प्राप्नोति॰ अत्र गुणाधानं महापकर्षे अनं संस्कार्ज्यं कर्म॰ ध

९

श्रीः ५४ ५६

सिद्धः कर्त्ता · राज्यं कर्म · प्राप्नोति क्रिया · प्र उपसर्गः · आप्लृ व्याप्तौ धातुः · उभयपदी · अ
निट् · सकर्मकः · पातेषु · जपसंज्ञायां · जि पृक्षर रागे · आप्लृ व्या
प्तौ · डुवप विजनंगुसां तानेः · ञिष्वप शये · लपरि भाषणे · लिप उपदेहे · जपप्रेः · हृष हर्षण
येयो · स्तु प्रगतौ · शश्रौ क्रोशे · छुप स्पर्शे · क्षिप प्रेरणे · त्रयोदश अनिटः । अन्ये पंतानाः सेटः ।
सोमपा यज्ञकर्त्ता · सोमं अमृतं लतां · सुनोति स्नाति · पिबति तदर्थः । षुञ् अभिषवे · अभि
षवः स्नानं · स्नपनं · सराधानं च · चकारात् स्नानमपि · अन्नस्नानं पानं च गलजे · धातुः उभ

रामजी

नृमानजी।

१०

पदीः अनिट्। सकर्मकः। अत्र पूर्वावस्थापरित्यागः अवस्थांतरं प्राप्तिः तद्धिका
र्यकर्म। सोमः कर्त्ता। सोमं कर्म। सुनोति क्रिया। अभितश्च सर्वतश्च अभिसर्वौ तयोर्योगे ति
अभिसर्वतसोः द्वंद्वः तेन भूयमाणपदं त्यन्येक मभिसंवध्यते। तेन अभितोयोगे द्वितीया
कार्या। अभितो ग्रामं नदी वहति। अभितः अव्ययं। ग्रामं कर्म। नदी कर्त्ता। वहति क्रि
या। सर्वतोयोगे द्वितीया कार्या। कर्मणि भवति इत्यर्थः। सर्वतो ग्रामं तरवो दृश्यन्ते। स
र्वतः अव्ययम्। ग्रामं कर्म। तरवः कर्त्ता। कर्मणि प्रयुक्तः। अतः कर्मकर्त्ता। दृश्यन्ते क्रिया
धिग्योगे द्वितीया कार्या। धिग् देवदत्तं। धिग् अव्ययम्। देवदत्तं कर्म। उपर्यादिषु उ

त्रिषु

१०

क५

श्रीः श्रीः

प्रति अव्ययं· वर्त्तते क्रिया· पांथं ऊरूं अधियाति· पंथः कर्त्ता· ऊरूं कर्म· अधि अव्ययं· या
ति क्रिया· रथं परियाहकः रथोपरि सारथी इत्यर्थः। वाहकः कर्त्ता· रथं कर्म· परि अव्ययं· सर्पि
षोपि जानीते· परार्थसंभावनायां अपिर्ज्ञेन सर्पिषो बिन्दुमपि जानाति इत्यर्थः।
सर्पिषः षष्ठि· अपि अव्ययं· ज्ञा जानीते क्रिया· वनमनुनिशायितो ग्रामोऽस्ति· ग्रामः कर्त्ता·
वनं कर्म· अनु अव्ययं· शायितः कर्त्तृविशेषणं· अस्ति क्रिया· वनमनुयातः नेमि· अनु अव्ययं·
यातः कर्त्तृविशेषणं देवदत्तः इत्यध्याहार्यः। कालश्च अध्वा च कालाध्वनोरत्यंतसंयोगे काला
ध्वनोः सप्तम्यंतं· नैरन्तर्ये सप्तम्यंतं· अस्यार्थः कालवाचकेभ्यः पक्षमासऋतुवर्षादिभ्यः द्विती
या· नैरन्तर्ये अपरिच्छिन्नेऽर्थे यथा मासमधीते देवदत्तः अत्र स्वाध्यायवत् अहरहः अ

११

११

पर्य्यध्यधस्सु · आम्रेडितांतेषु हि उक्तेषु योगे द्वितीया कार्य्या · याचकाः पुरोहितं उउ
परि उपरि पतंति · याचकाः कर्त्ता · पुरोहितं कर्म · उपरि उपरि अव्ययं · गृध्रा व्याधं अधि अधि २
धावंति · गृध्राः कर्त्ता · व्याधं कर्म · धावंति क्रिया · अधि अधि अव्ययम् · निधिः ग्रामं अधो
ऽधो वर्त्तते · निधिः कर्त्ता · ग्रामं कर्म · अधो अव्ययम् · ततः अन्यत्रापि · समया निकषा ·
हा प्रति · अधि परि · अपि · अनु इत्यादि योगे द्वितीया कार्य्या · समया ग्रामं फलं प्राप्तं · स
मया अव्ययं · ग्रामं कर्म · लंजी · प्राप्तं क्रिया · अत्र कर्त्तरि क्तः कर्त्ता कर्म · निकषा ग्रामं
फलं प्राप्तं · निकषा अव्ययं · ग्रामं कर्म · व्यवधाने समीपे समया · अव्यवधाने समीपे निक
षा · हा देवदत्तं · हा अव्ययं देवदत्तं कर्म · प्रति ग्रामं वनं वर्त्तते · वनं कर्त्ता · ग्रामं कर्म ·

संदेहजे॰

गिमंग्रथाध्ययनंबोध्यं॰देवदत्तः कर्त्ता॰मासंकर्म॰अधीते क्रिया॰एवं अध्ववाचकेभ्यः॥
क्रोशंगच्छति॰योजनादिभ्यः। द्वितीयाकार्यानैरंतर्ये अत्यन्तसंयोगेऽर्थे यथा क्रोशंपर्वतः क्रो
शावच्छिन्नंदेशमभिव्याप्यवर्तते॰ऽस्तीत्यर्थः।पर्वतः कर्त्ता॰क्रोशंकर्म॰अस्ति अध्याहृति
क्रिया॰अकर्मकधातुभिर्योगे देशःकालोभावोगंतव्योऽध्वाचकर्मसंज्ञइतिवाच्यम्॰यथा
वंगमधिशेतेकलिंगःकुलिंगः कर्त्ता॰वंगंकर्म॰अधिशेते॰क्रिया स्वप्नमधिशेतेज्ञा
नंहृदयंकर्त्ता॰ज्ञानंकर्म अधिशेते॰क्रिया॰इतिद्विकर्मकारकम्॰अथतृतीयाकरणकार
कम्॰तत्रकरणंद्विविधं॰बाह्यं आभ्यंतरंच॰बाह्यंदात्रादि॰आभ्यन्तरंदंतनखादि॰पुनस्त

पृ३

राम॰

अउक्तेकरणेप्रथमा· अनुक्तेकरणे अनुक्तेकर्त्तरिचतृतीया· अतः उक्ता उक्तभेदेन
करणंचतुर्विधंतद्यथा· कर्त्तरि ७ प्रधाने १ क्रियाश्रये १ साधने १ चअस्मयं· अनेकपद
वच्छिन्नंसूत्रं· अस्यार्थः क्रियानिमित्तेप्रधाने अनुक्तेकर्त्तरितृतीयाचपुनः क्रिया
श्रये क्रियासिध्युपकारकेसाधनेकरणेप्रधाने अनुक्तेतृतीया· क्रियायाःसिद्धिः क्रिया
सिद्धिः क्रियासिद्धौ उपकरोतिसहायतेइतिक्रियासिध्युपकारकंकरणं उच्यते· तत्र
तृतीयायथा· रामेणशरेणरावणोभिन्नः कथंभूतेनरावणः लोकेरोतिचयस्मिन्लोकराव
णः॥ अपिपुनः बाणैः कराणमाणनखेनवीरोणरावणः पुनः पुनः मुहुर्मुहुर्युध्यतेस्वयमित्यर्थः

श्री०॥

रामेण अनुक्तकर्त्ता · शरेण अनुक्तकर्त्तारणं याहं · रावणः उक्तकर्म · भिन्नः क्रिया · लोक
रावणः कर्मविशेषणं · अपि अव्ययं · वानरैः अनुक्तकर्त्ता · करणेन अनुक्तकरणं · आभ्यं
तरं विदीर्णः क्रियाकर्मणा विशेषणीभूता · पुनःपुनः अव्ययं · रामेण कर्मकर्त्ता · युध्यते क्रि
या · कर्मणि णपकृ · युध संप्रहारे धातुः ॥ आत्मनेपदी · अनिट् · सकर्मकः युधि रावणेन · एधासंसि
द्धो · युध संप्रहारे · बंधय धने ॥ साधसिद्धौ · क्रुध क्रोधे · क्षुध बुभुक्षायां · शुध शौचे · ॥ बुध अव
गमने ॥ व्यध [illegible] ताडने · षिध गत्यां · धानेवुए कारदश अनिटः ॥ अन्ये धातवः सेटः ।
इति त्रिया कारकम् ॥ अथ चतुर्थी संप्रदानकारकम् ॥ धातुवाच्या क्रिया · क्रियाया वाचकं
कार[illegible] कं ॥ तत्र संप्रदानं द्विविधं · इष्टम् अनिष्टं च · इष्टं कस्यान साधनहेतुकम् · पारलौ

राम ॥

श्रीनृसिंहं भजे॥

किं वा· तद्धि परितं अनिष्टं ऐहलौकिकं वा· पुनः उक्तानुक्तभेदेन चतुर्विधम्· तत्र उक्ते प्रथमा·
अनुक्ते चतुर्थी· तद्यथा· दानपात्रे सम्प्रदानकारके चतुर्थी प्रथमान्तम्· अस्यार्थः॥ सम्यक्कृत्ये
योग्याय यस्मै प्रदीयते तत् संप्रदानं॥ तस्मिन् संप्रदानकारके दानपात्रे चतुर्थी· कारक
मंत्राधिकारतो बोध्यं· कारके इत्यधिकृत्य सर्वत्र संज्ञाविधानात्· यथा देवदत्तः वेद
विदे गां ददाति॥ देवदत्तः कर्ता· गां कर्म· ददाति क्रिया· वेदविदे चतुर्थी· अत्र गोदानेन
परलोकसाधनैकस्थानहेतुफलं पारलौकिकं· देवदत्तः छात्राय कन्यां ददाति· देवदत्तः
कर्ता· कन्यां कर्म· ददाति क्रिया· छात्राय चतुर्थी· अत्र कन्यादानेन भवं तो कन्याप्रा
प्ति फलं ऐहलौकिकम्॥ पुनः स्वर्गलोकनिवाससाधनफलैकस्थानहेतुकं॥ न च
त्र संप्रदानकारकं न ग्राह्यं दानपात्रे चतुर्थी चत्यनेनैव सूत्रमस्तु॥ तथा च· पुत

वे ७

१३

१३

श्री०

गोमहिषपत्ते दंडं ददाति इत्यत्र चतुर्थीप्रसक्तौ · गराढ्यान्ते अत्र च कर्मणो नवृत्तः
न चात्र भक्तिः न च दानकाम्यायाइति हेतोः यस्सदा महीपतिः पुरुषानूद्दाड
पतिजनदा पुरुषो ददाति न दानवुद्ध्या किंतु पात्रे वासनया दानवुद्ध्या यदीयते
मुनीन्द्रैः तत्संप्रदानं कथितं · नह्येकमुदाहरणं · पोगार्थं प्रयोजयति अत्र आत
रजकस्य वस्त्रं ददाति देवदत्तः अत्रे च कर्मणीन · दानवुद्ध्या भावात् · एवं शिष्ठकोपाध्यायः
शिष्याय चपेटिकां ददाति · इत्यत्र चपेटिदानं कल्याणसाधनहेतुकं · इति चतुर्थी का
कम् · अथ पंचमी अपादानकारकम् · विश्लेषावधौ पंचमी · अस्यार्थः । विश्लेषो
विभागः तत्र योवधिः आदिकारणं सद्विविधः चलः अचलो वा · तत्र अपादान

राम०

(14)

क्रौमुदीहंनजे·

१७

इत्येपंचमी। यथा। उक्तो अपादाने प्रथमावस्पते। अनुक्ते पंचमी। यथा देवदत्तः
धावतः अश्वात्। अपतत्। देवदत्तः कर्त्ता। धावतो विशेषणं। अश्वात् पंचमी। अ
पतत् क्रिया। अत्र चलत् अपादानं गंगा भूभृतो हिमवतः। अवतरति। गंगा क
र्त्ता। भूभृतो पंचमी। अवतरति क्रिया। अचलत्वे अपादाने अत्र। क्रियासाधने नि
छं अपादानं। उक्तानुक्तभेदेन चतुर्विधम्। इति अपादानकारकम्। पंचमी। अ
थ षष्ठि तत्र सूत्रं। संबन्धे षष्ठी तत्र। अस्यार्थः। भेद्यकभेदकयोः॥ अन्योन्यं परस्
परम् अभिलषः मेलनं संबंधः इष्यते कथ्यते। यद्यपि भेदको भवत्यनिष्ठः संबन्धः तथा
पष्षुत्पत्तिभेदकादेव जायते। अत्र आह। संबंधिनो भिन्नत्वे यः। अप्रधानस्त
त्र षष्ठि। भेद्य प्रधानं दृश्यमानमिति वा। भेदकं अप्रधानं अदृश्यमानमिति

वा· यथास्यपुत्त्र षराज्ञः ज्ञेयः अप्रतुनुषः कर्त्ता· तद्विशेषणं· ज्ञेयः क्रिया· राज्ञः ष
ष्ठी· एतस्य पूजनं पित्रोर्विशेषः एतद्विशेषणं· पूजनं कर्त्ता· ज्ञेयं क्रिया· पित्रोः
षष्ठी· माता च पिता च पितरौ· तयोः पित्रोः॥ यः शिष्यते स लुप्यमानार्थाभि
धायित्तेन माता पित्रोरित्यर्थः॥ गुरूणां वचनं पथ्यं हितं भवति· वचनं कर्त्ता·
पथ्यं विशेषणं· भवति क्रिया· गुरूणां षष्ठी· कवीनां वचः सद्भवति· स्वधात्वा
द्विभमित्यर्थः॥ कवीनां षष्ठी· वचः कर्त्ता· सत् तद्विशेषणं· भवति क्रिया· संबंध
स्यापि भयनिष्ठत्वेपि रादेः षष्ठी· ननु पुत्रुषादेः कुतः अदृष्टत्वात्· क्रियान
न्वितत्वेन षष्ठ्याः कारकत्वं नास्ति· यथा देवदत्तस्य धनं यस्सौन्त्यादीद शास्त्रि
साधांधनस्यान्वयत्वात्· कर्मकारकसंज्ञा न तु· देवदत्तस्य इति षष्ठी विभ

ज्ञा३

१५

न्तिः॥ अथ सप्तम्यधिकरणकारकम्॥ आधारे सप्तमी॥ ११ ॥ अस्यार्थः यत्र तिष्ठति सं आधा
रः। यस्मिंस्तिष्ठति स आधारः॥ आधारे ७ प्रथमा। आधारे अधिकरणं। षड्विधमधिक
रणं। औपश्लेषिकं १ परिदेशव्याप्तित्वं। यथा। असौ कुमारः कटे शेते कुत्रोपरिसेते
इत्यर्थः। कुमारः कर्ता। असौ विशेषणं। शेते क्रिया। कटे सप्तमी। औपश्लेषिकाधा
रः॥ २ कटः सामीपिकं। समीपदेशव्याप्तित्वं सामीपिकं। यथा। गावः वटे सन्ति शेरते वटस
मीपे इत्यर्थः। गावः कर्ता। शेरते क्रिया। सामीप्याधारे वटः वटे सप्तमी। वटसदृस
मूलाधारे शान्तिः। ननु शाखायां। अत्र कुमार गावौ आधेयौ। अभिव्यापकं सर्वदेश
व्याप्तित्वं यथा तिले तैलं तिलेषु विद्यते तैलं कर्ता। आधेयः विद्यते क्रिया। तिलेषु
सप्तमी। तिलावच्छिन्नसर्वदेशमभिव्याप्य इत्यर्थः। अभिव्यापकं आधारः।

प. १५

स्तो॰ ११

त्तिलः वैषयिकिकं । एकदेशव्याप्तित्वयथा ॥ ब्रह्म हृदि व्याप्तं परं वर्त्तते । ब्रह्म कर्त्ता । आधेयः ।
अनन्तं नाशरहितं परं मायातीतं निर्लिप्तं शुद्धं सच्चिदानंदैकं विनीभूतं सर्वान्त्कृष्टं मनोगोचरं म
हृष्टमित्यर्थः । तदुक्तं एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन । इत्यादिश्रुतेः ॥ ब्रह्मणो विशेषणा
दृष्टमिदं । वर्त्तते स्फुरणा । हृदि सप्तमी हृद्याकाशगोचरमित्यर्थः विषयाधारहृति । नाभेन्द्रूर्द्ध्व
दशांगुलं । पुरुषः आत्मप्रतिष्ठतः । इत्यादिश्रुतेः ॥ यस्मिन्नित्यभर्थेकार्ये तन्निमित्तमुदाहरति ॥
निमित्तव्याप्तित्वं नैमित्यकं । यथा । धीरेषु ब्रेंधे सनह्यते सर्वलोकमयवानयारणाकं च कान्तवरं प
रिदधातीत्यर्थः धीरः कर्त्ता आधेयः । संनह्यते क्रिया । णहबन्धने धातुः स पूर्वकः उभयपदी अ
कर्मकः अनिट् । लान्तेषु । हृदि हृदुपचये दृहप्रपूरणे । मिहसेचने । उह बीजजन्मनि प्रादुर्भावे ।

16

श्रीः

यत्प्रापणे· नहवंधने·॥ ६ ॥ भस्मीकरणे· लिहआस्वादने· ८· अनिटः अन्येहान्तास्सेटः॥ यु
द्धेसप्तमी· युद्धे निमित्ते इत्यर्थः॥ निमित्ताधारो युद्धं दिगदर्शनव्युत्तिंत्वं औपचारिकं·॥
यथा· करिणांशतं गजव्रात· अंगुल्यग्रेवर्त्तते· करिणांशतं कर्त्ता आधेयः अलुक्समासः
वर्त्तते क्रिया· अंगुल्यग्रेसप्तमी· अंगुल्यग्रेस्थितो द्वारा गजव्रातदर्शनं औपचारिकं· औप
चारिकाधारो ५ गुल्यग्रः॥ इयं षट्पदी गाथा· उक्तानुक्तभेदेन आधारो द्वादशविधः॥ लक्ष्य

१६

णाशक्तिसंबंधः॥ यथा गंगायां घोषः घोषस्य तीरपर्य्यासत्त· गंगा अविच्छिन्नधाराप्रवा
हिका· अविछिन्नधाराप्रवाहिका न गच्छतीति गंगा इति व्युत्पत्तेः तत्र घोषस्थितिर्गंगा
यां कथं आधाराभावात्· अतो मुख्यार्थबाधे लक्षणा· किं च गंगाशब्दस्य प्रवाहे
शक्तिः॥ तीरे लक्षणा· तेनोपलब्धः गंगातीरे घोष इति· तद्गतशैत्यपावनत्वादिधर्म्म णानी

श्री:१

रशब्दवाच्यांगगात्रंलक्ष्यते॰ अत्राधारो द्विविधः सामीपिको ऽभिव्यापकः अत्र संश्लिष्टा
रः वाण्यश्वः अत्र असंश्लिष्टाधारः इदं भेदद्वयं भाष्यप्रपंचितं॥ अथ च॰ लक्षणा द्विवि
धा तात्पर्यानुपपत्तिपूर्विका यथा काकेभ्यो दधि रक्ष्यतामित्यत्र उच्चारितः शब्दः प्रत्याय
को नानुच्चारि इति निष्कामकवाक्येन काकेभ्यो रक्ष्यतां किंमार्ज्जारेभ्यो दधिभक्ष्यतां॰ एतत्ता
न॰ दधिरक्षणे तात्पर्यबोधात्॰ सर्वेषां दधिभक्षकाणां मार्ज्जारकुक्कुरादीनां काकइ
त्युपलक्षणं॰ एवं अन्वयानुपपत्तिपूर्विका यथा मंचाः आक्रोशंति इत्युच्यमाने मंच
नां आक्रोशाशक्तेर्मंचस्थानामुपलक्षणं तेन मंचस्था जना॰ आक्रोशंतीत्यर्थः एवं सिं
हो मानवक इत्यत्र सिंहपदस्य अप्रतापवान्रूपे मानवक इत्यर्थः॥ गौर्वाहिकः इत्य

न सिं कृ भ जे ·

१०

त्र गे तुल्पभारवाहकोऽयं मानवक इत्यर्थः इति लक्षणाख्यातिः ॥ भावे सप्तमी ॥ यस्यार्थः क्रि
यालक्षणं भावः तत्र भावे सप्तमी विभक्तिर्भवति · प्रसिद्धक्रियया अप्रसिद्धक्रियाल
क्ष्यते स भावः तद्यथा · देवे वर्षति सति चैरः आयातः देवे सप्तमी · वर्षतीति क्रियाविशेषणी
भूता चैरः कर्त्ता · आयातीति क्रियाकर्त्ता विशेषणीभूता · अत्र देववर्षणं प्रसिद्धक्रिया ·
चौरागमनं अप्रसिद्धक्रिया · अंशुमालिनि सूर्ये पतति मंसं गतवति सति आरातिः
शत्रुः पतितः अस्तंगतवान् म्लत इत्यर्थः अत्र महाभारते यद्वा अर्जुनसंवादे कथान
कमिदं बोध्यं · अंशुमालिनि सप्तमी पततीति क्रियाविशेषणीभूता · आरातिः कर्त्ता · क्रि
याकर्त्ता विशेषणी भूता · इति सप्तम्यधिकरणकारकं ॥ अथोपपदविभक्तयः विनासह

नमस्ते निर्झररोः स्वात्पादिमिश्च ॥ अस्यार्थः । विनायोगे द्वितीया । विना अन्तरेण ·
अन्तरा · एते विनादयः । यथा · पापं विना सर्वे फलन्ति · सर्वे कर्त्ता · पापं कर्म · अत्र विनायोगे
पापं द्वितीया · फलन्ति क्रिया · अक्षरेण अन्तरेण नेत्रं विना पुंसा जीवितेन किं कथा · अत्र अक्षरेणि
द्वितीया · कर्म · अन्तरेण अव्ययं किं अलमर्थे अव्ययम् · जीवितेन तृतीया · अत्र पृथार्थकमलं तृती
या दर्शनात् · अलं पर्याये किमिति भाष्ये उक्तं · त्वां मां अन्तरा त्वन्मममध्ये मरि भुवः कृष्णः । म
धुरिपुः कर्त्ता · त्वां मां कर्म · अन्तरा अव्ययं · मध्ये पर्याये · एवं सहयोगे तृतीया · सहशब्दं सा
कं साकं समं एते सहादयः । यथा गुरुः शिष्येण सह आगतः । गुरुः कर्त्ता · शिष्येण तृतीया · स
हयोगे सह अव्ययं · सार्थपर्याये चैत्रः मैत्रेण सदृशः · चैत्रः कर्त्ता मैत्रेण तृतीया सदृशम् अव्ययं ·

कृष्णः

श्लोकस्थः

१८

चैत्रन्नमानोच्छात्रैः॥ रत्नानयनाभ्यां साकं श्लक्ष्णाशोभचकचकायमानं नेत्रद्वंतान्द्वारां
गनाभवंतिइतिभावः॥ रत्ना· कर्त्ता· श्लक्ष्णा विशेषणं नयनाभ्यां तृतीया· सार्थे पर्याये साक
मव्ययं· साधुः धनिभिः सार्द्धं धन्त्तः संगदो वेणवद्धं इत्सर्थः। अत्र धनीकुटुम्बः अन्तः साधू
नां एकान्त विहारः उचितः साधूः कर्त्ता· धन्त्तः क्रिया· धनिभिः तृतीया· सार्थम यीयेसा
र्द्धमव्ययः· गुरुः चन्द्रेण समं उदितः॥ चन्द्रवत् उदितः उज्ज्वलप्रकाशान्वान्· गुरुः कर्त्ता·
उदितः क्रिया· चन्द्रेण तृतीया· सार्थे पर्याये तुल्यपर्याये च समव्ययम् एवं नमः आदि
योगे चतुर्थी· विसर्गलोपशिनसंधिः नलोपशितुभवन्ये यस्वादिरिति निर्देशात्· नमः
स्वस्ति· स्वाहा· स्वधा· अलं· वषट्· एतेन मः आदयः· यथा नारायणाय नमः। नारायणे चतु

१८

कल्याण॰

नसिंहंनत्रे॰१

र्थी॰ नमोयोगेनमः॰ अव्ययं॰ नमर्थे॰ राज्ञेस्वस्तिकल्याणमस्तु॰ राज्ञेचतुर्थी॰ स्वस्तिँ अव्ययं॰
सोमायस्वाहा॰ सोमायचतुर्थी॰ स्वाहादेवहविर्दाने॰ अव्ययं॰ पितृभ्यःस्वधा॰ पितृभ्यःचतु
र्थी॰ स्वाहापितृहविर्दानेऽव्ययं॰ मल्लायमल्लः अलं॰ मल्लःकर्त्ता॰ मल्लायचतुर्थी॰ अ
लंसामर्थ्येऽव्ययं॰ इन्द्रायवषट्॰ इन्द्रायचतुर्थी॰ वषट्हविर्दानेऽव्ययं॰ ऋते आदियोगे
पंचमी॰ ऋते॰ अन्य॰ भिन्न॰ परं॰ एते ऋते अव्ययः। यथा॰ ज्ञानादृते ज्ञानं विना मुक्तिर्न॰
मुक्तिःन निषेधार्थेऽव्ययं॰ ज्ञानात्पंचमी॰ ऋते वर्जनार्थेऽव्ययं॰ ऋते योगे ज्ञानात् पंचमी॰ गृ
हात्अन्यःविहारः अन्यत्रसुखस्थानं॰ विहारःकर्त्ता॰ गृहात्५ अन्यः अन्यार्थेऽव्ययं॰ कृष्णा
द्भिन्नःप्रद्युम्नः प्रद्युम्नःकर्त्ता॰ कृष्णात्५ भिन्नः विशेषणं॰ इन्द्रियेभ्यःपरंमनः। मनःकर्त्ता॰)

एतः

रुत्त·

१९

परंविशेषणं· इन्द्रियेभ्यः५ किंचिद्भिन्नविभक्तिकानां असाहित्य भेदेदृष्टः इतिभाष्य:
निर्द्धारणेवाष्ठी· अलुक्समासे· अस्यार्थः। क्रियागुणजातिसंज्ञाभिः समुदायात्पृ
थक्करणं निर्द्धारणं॥ यत्रक्रियावाचकशब्दसंघाते एकंक्रियावाचकशब्दं पृथक्करणार्थः क्रियते
तत्रषष्ठी यथा· क्रियापराणां मध्येभगवदाराधकः श्रेष्ठः। क्रियापराणां षष्ठी। भगवदा
राधकः कर्त्ता· श्रेष्ठः विशेषणं· अत्र उपासनावाचकशब्दा क्रियाभक्ति। शुक्लादिव
र्णवाचकागुणशब्दा· यत्रगुणशब्दसंघातेभ्यः। एकंगुणशब्दं पृथक्करणार्थः। क्रियतेत
त्रषष्ठी यथा· सर्वासांवर्णविशिष्टानांगवांकृष्णावर्णीयागौः सासंपन्नक्षीरा वहुदुग्धवति·

१९

न्यर्थः गवांषष्ठी॰ कृष्णागोः कर्त्री॰ संपन्नक्षीराविशेषणं॰ वर्णवाचकाशब्दाजातिशब्दा॰
यत्रजातिशब्दसंघातेभ्यः एकजातिशब्दः पृथक्कृत्यर्थः क्रियते तत्र षष्ठीयथा॰ ए
तेषांवर्णानां मध्ये क्षत्रियः शूरतमः प्रोक्तो भवति॰ एतेषां षष्ठी॰ क्षत्रियकर्त्री॰
शूरतमः विशेषणं॰ संकेतज्ञानं संज्ञा॰ यथादेवदत्तयज्ञदत्तविष्णुमित्रचैत्रमै
त्रइत्यादिसंज्ञाशब्दसंघातेभ्यः पृथक्संज्ञा यत्र एकसंज्ञाशब्दस्तदर्थः क्रियते त
त्र षष्ठीयथा॰ छात्राणां मैत्रः पटुः छात्राणां षष्ठी॰ मैत्रः कर्त्री॰ पटुः विशेषणं॰ स्वामीई
श्वरः अधिपतिः दायादः साक्षी॰ प्रतिभूः प्रसूतः एभिः सप्तमीयोगे सप्तम्यो॰ यथा गवां गोषुवा॰
स्वामीईश्वरः अधिपतिः दायादः साक्षी॰ प्रतिभूः प्रसूतः गवांषष्ठी॰ गोषुस्वामी॰ स्वामीत्या
सप्तमी॰ कर्त्री॰ चकारात्षष्ठीसमुच्चीयते॰ सप्तमीतुप्रकरणबलात्॰ अत्रापि द्वन्द्वेनाप

रिमायथासर्वत्रापिस्थलामनः। भिन्नतःसि विभक्तिकदूनरूडश्च उत्वचेति भाष्यप्रमाणं।
कर्तृकार्ययोरकादौ कृति षष्ठी। अस्यार्थः। अनुक्ते कर्त्तरि कर्मणि च षष्ठी क्तादिवर्जि
ते कृदन्ते शब्दे प्रयुज्यमाने सति। यथा व्यासस्य कृतिः व्यासस्य षष्ठी व्यासेनेत्यर्थः कृ
तिः क्रिया। अत्रानुक्तकर्त्ता। कृयाभावे त्रिप्रत्ययः॥ तारजस्य श्रवणं। भार
तस्य अनुक्तकर्मणि षष्ठी। द्वितीयार्थे श्रवणं कृया। भुवो भावे युट्। भावेन पुंक्ते। अनका
दौ यथा। न लोपाकाव्ययनिष्ठाखलर्थेषु तृणां। ल। शतृ। यथा देवदत्तः ग्राम गच्छन्
पठति। शानृ यथा पचमान ओदनं तिष्ठति। क्वसु यथा गारद्वियान् वर्त्तते। कानच यथा शा
स्त्रं चकाराणः। आन यथा शास्त्रमकुर्वान् गच्छति। उकरण यथा देवदत्तः राज्ञानं भि
क्षुकः। उप यथा। अलमाम्सशुःशत्रुं। षाकु यथा राज्ञानं भिक्षाकः। तृच यथा स्र्यं नत्वा गतः।
अव्यय यथा परमात्मानं प्रणम्य सारस्वती कुर्वे। तुमु यथा सागरं तर्त्तुं कामः। णम यथा स्मारं

३०

ग्री· स्त्र४ स्वा· बोध्यते॥

स्मारं गुरोर्वचः ॥ यथा देवदत्तं दुःखं करोति · च्चिय यथा वसन्त्र विष्णुं किं करोति · त्ति छाय यथा देवद
त्तेन वृतः स्तूतः ॥ विष्णुर्विश्वं कृतवान् · त्तायन्तुः खलय यथा वसन्त्र विष्णु रात्रिंचरः अर्थः यथा कि
यथा गां दृष्टिः उराय यथा त्तंतुमायुः विष्णुयशा अलंकरिष्णुः कन्या · युक्तम् यथा शिलमस्त
कान्तुकः श्राय यथा शाखं नमधि यनः यज्ञमकुर्वीराः स्नातो शगाननूचानसौ · त्तरणाय यथा कटक
त्तौ · देवदत्तं इत्यादौ कर्तरि कर्मणि षष्ठी न इति कारकपः ॥ स्मर्त्तौ च कोष्यि अस्यार्थः स्मरति ·
मन्यते · बुध्यते · जानाति · अनुभवति · बोध्यपति · वेत्ति इत्यादि स्मृत्यर्थीनां धातूनां कर्मणि
अनुक्ते द्वितीया षष्ठी यथा देवत्तः मातुर्मातरं वा स्मरति · जानाति · अनुभवति · बो
धयति · वेत्ति इत्यादि ॥ हेतौ तृतीया पंचमी च वक्तव्या अस्यार्थः शब्दः अनीत्यः कृतकत्वे
न हेतुना कृतकत्वाद् इनोः शब्दं पन्दीकृत्य अनीत्यत्वं साध्यते कृत्रिमत्वं हेतुः शब्दः

सिंहं भजे ॥

२१

र्त्ता॰ अनित्यः विशेषणं कृतकत्वेन हेतोः कृतकत्वात् ॥ परंतु शब्दं नित्यमाहुः वर्णात्म
कत्वात् अस्य संग्रहले जिसुत्तेः ध्वन्यात्मकं अनित्यमाहुरिति सिद्धान्तः॥ भयहेतौ पंच
मी॰ अस्यार्थः देवदत्तः चोराद्बिभेति॰ भयहेतुश्चोरः चौरात्पंचमी॰ देवदत्तः कर्त्ता॰ वि
भेति क्रिया॰ सर्पं व्याघ्रात् बिभेति भयहेतुर्व्याघ्रः व्याघ्रात् ५ त्रस्यति क्रिया॰ सर्पं वि
द्युमानानां किंतु भयहेतु विद्युत्पातः विद्युत्पातात् ५ चकितः क्रिया॰ षष्ठी हेतुप्रयोगः
अस्यार्थः हेतुशब्दस्य प्रयोगे षष्ठी गच्छीय॰ थाइ यकन्याकस्य हेतोः हेतुशब्दयोगे कस्य
षष्ठी॰ कन्याकर्त्ता॰ इयं कविशेषणं॰ वर्त्तते क्रिया॥ इत्थंभावे तृतीया॰ अस्यार्थः॥ अन्ये
पचारेण वर्त्तमानः स इत्थंभावः तत्र तृतीया॰ पुत्रेण शिष्यं पश्यति॰ पुत्रत्व आरोपेण इ
त्थंभावः इत्थंभावे पुत्रेण तृतीया॰ शिष्यं कर्म॰ पश्यति क्रिया॰ देवदत्तः कर्त्ता॰ स्वयम्

२१

सारेणसंसारंपश्यति॥ अवलुनिपस्वारोपेणाइत्थंभावेः असारेणइत्थंभावेतृतीया॥
संसारंकर्म॰ पश्यतिक्रिया॰ येनांगविकारेः अस्यार्थः अंगिनो अंगविरोयेन अंगे
नलक्ष्यतेतस्मात्॰ अंगात्तृतीयायथा॰ देवदत्त अन्दणाकाणः अन्दणाअंगविका
रे१काणः विशेषणोदेवदत्तः कर्ता॰ सर्वपादेनखंजः पादेन अंगविकारे१खंजः
विशेषणंसर्वं शिरसाखल्वाटः विशेषणाहस्तपादअन्दिनाशिकाकर्णशिरो
मुखंसर्वभः तृतीयाहस्तेनकेकरः नाशिकाभ्यांचिपटः मुखेनवक्रः कर्णाभ्यांवधि
रः॥ जनिकर्तुः प्रकृतिः॥ अस्यार्थः जायमानस्य उत्पद्यमानस्यकार्य्यस्यतत् उपा
दानंनामअत्रादिकारणंतत्अपादानसंज्ञंभवति॰ तत्रअपादाने पंचमी॰ यथा॰

य७

२२

ष्टी०

तस्मात्प्रजाः प्रजायन्ते तद्धूलेति विदुर्बुधाः विदुः। धूलिलक्षणमिदं यस्मात् अपादा
नेपंचमी। प्रजाः कर्त्ता। प्रजायन्ते क्रिया। यज्जायन्ते तत्कार्यमिति त्रप्रथमा। यतो भ
वतीति तत्कारणं तच्चतुर्विधं समवाय्यकारणं देवापादानं आदिकारणं चोच्यते।
तत्र पंचमी। द्वितीयं असमवाय्यकारणं। तत्र चतुर्थी तृतीयं निमित्तकारणं तत्र
सप्तमी। धूलि घोतकोपलक्षणं यस्माद्धूलेरित्यर्थः। आगमादियापंचमी। अस्या
र्थः। आगम आरभ्य अपर्यन्तं एतद्योगे पंचमी। यथा आपाटलिपुत्रात्को ऽर्थः
इतः आरभ्य पाटलिपुत्रमर्यादीकृत्य देवो वृष्टः। मर्यादाया आगत योग
पाटलिपुत्रात्पंचमी। देवः कर्त्ता। वृष्टः क्रिया। तादर्थ्ये चतुर्थी वक्तव्या। अस्या
र्थः। तस्मै प्रकृत्यार्थाय ऽर्थः। तदर्थः तदर्थस्य भावः तादर्थ्यं तस्मिन् तादर्थ्ये

श्रीरक्षा·

चतुर्थी· यथा· मेधावी नरः स्तुतिं धत्ते कस्मै प्रयोजनाय संजेमाय· मेधावी विशेषणं· नरः
कर्त्ता· स्तुतिं कर्म· धत्ते क्रिया· संयमाय तादर्थ्ये चतुर्थी· एवं मेधावी समं धत्ते कस्मै प्रयो
जनाय धर्माय· मेधावी विशेषणं· नरः कर्त्ता· संयमं कर्म· धत्ते क्रिया· धर्माय तादर्
थ्ये चतुर्थी· मेधावी नरः धर्मं धर्मं धत्ते कस्मै प्रयोजनाय मोक्षाय मेधावी विशेष
णं· नरः कर्त्ता· धर्मं कर्म· धत्ते क्रिया· मोक्षाय तादर्थ्ये चतुर्थी· मेधावी नरः धनं ध
त्ते कस्मै प्रयोजनाय दानाय भुक्तये च। मेधावी विशेषणं नरः कर्त्ता· धनं कर्म·
धत्ते क्रिया· दानाय भुक्तये च तादर्थ्ये चतुर्थी॥ क्रुधादियोगे च· असूयार्थैः। क्रुध·
द्रुह· ईर्ष्या· असूयार्थानां धातूनां योगे चतुर्थी॥ यथा· देवदत्तः क्रूराय क्रु
ध्यति· क्रूराय कर्मणि चतुर्थी· क्रुध्यति क्रिया· देवदत्तः कर्त्ता· स्वयं विप्राय द्रुह्य

क्रोन सिंहं भजे

सर्वं ई मित्राय ईर्ष्यति· मित्राय कर्मणि चतुर्थी· ईर्ष्यति क्रिया·। ल्यप्लोपे कर्मणि अधिकरणे पं
चमी वक्तव्या·॥ अस्यार्थः। ल्यबन्तं विना ल्यबन्तार्थप्रतीतिः ल्यप्लोपः तस्मिन् ल्यप्लोपे पंच
मी·। यथा· हर्म्यात् प्रेक्षते देवदत्तः हर्म्यमारुह्य प्रेक्षते इत्यर्थः। हर्म्यात् कर्मणि पंचमी· प्रे
क्षते क्रिया· देवदत्तः कर्त्ता· आरुह्येति ल्यप्·। एवं आसनात् प्रेक्षते आसने उपविश्य प्रेक्षते
इत्यर्थः आसनात् अधिकरणे पंचमी· प्रेक्षते क्रिया· उपविश्येति ल्यप्·। निमित्तात्कर्म

२३

संयोगे सप्तमी च वक्तव्या·। अस्यार्थः। निमित्तमिह संयोगः यत्र कारणेन सह कार्यस्य सं
योगः तत्र कारणे सप्तमी· यथा देवदत्तः द्वीपिनं हन्ति· कस्मिन् निमित्ते चर्मणि· अत्र भव्याख्यस्य च
र्मणः संयोगः अतो निमित्ते च कर्मणि सप्तमी· देवदत्तः कर्त्ता· द्वीपिनं कर्म· हन्ति क्रिया· हन हिंसा
गत्योर्धातुः परस्मैपदी सकर्मकः अनिट्· नान्तेषु· मन ज्ञाने· हन हिंसागत्योर्द्वौ अनिटौ· अ
न्येनान्तौ: सेटः। देवदत्तः कुंजरं हन्ति केयोर्निमित्तयोर्दन्तयोः। अत्र दन्तस्य कुंजरस्य संयोगः

२३

केश

क्रोशत्सिंहभजे ॥

अतो निमित्तैरंतयोः सप्तमी· देवदत्तः कर्त्ता· कुंजरं कर्म· हन्ति क्रिया· देवदत्तः चमरिं हंति· केषु
निमित्तेषु केशेषु· अत्र संस्पर्चमर्मण्योः संयोगः। अतो केशेषु सप्तमी· चमरिं कर्म· देवदत्तः
कर्त्ता· हन्ति क्रिया· देवदत्तेन पुष्कलको हतः। कस्मिन्निमित्ते सिम्नि· पुष्कलको गंधमृगः
सीमा गाडकोशः। देवदत्तेन कर्त्ता· पुष्कलकः कर्म· हतः क्रिया· अत्र पुष्कलस्य सीम्नः स
योगः। अतो निमित्ते सिम्नि सप्तमी। विषये सप्तमी ॥ अस्यार्थः स्पष्टः यथा देवदत्तो ज्ञ
के चतुरः। देवदत्तः कर्त्ता· चतुरः विशेषणं· ज्ञके विषये सप्तमी ॥ षष्ठीसप्तम्यौ चानादरे ॥
अस्यार्थः ॥ अनादरे तिरस्कारेऽर्थे षष्ठीसप्तमी· यथा वहुनां क्रोशतां चौरो गतः। वहूनां अ
नादरे षष्ठी· क्रोशतां विशेषणं· चैरः कर्त्ता· गतः क्रिया· वहुषु साधुषु वदत्सु अनार्यः स्वप
मपि सैक्ष्यया असाधु मार्गेण कूपथा यानि गतः· वहुषु साधुषु अनादरे सप्तमी ॥ वदत्सु वि

स्वे२

रामः

शेषणं· अनार्य्यः कर्त्ता· स्वयमप्यप्ययं· असाधुमार्गेत्तृतीया· यातिक्रिया· बहुषु साधुषु निवा
रयत्सु साधुः आर्य्यः स्वयमपि स्वेक्षया साधुमार्गेणासत्यथायाति· गत्तः। बहुषु साधुषु अनाद
रे सप्तमी· निवारयत्सु विशेषणं· स्वयमप्यपं· आर्य्यः कर्त्ता· साधुमार्गेणात्तृतीया· यातिक्रि
या· मात्ता पित्रोर्तुदि तोः सत्तोः पुत्रः प्रव्रजति सन्यस्यतीत्यर्थः। पुत्रः कर्त्ता· प्रव्रजति क्रिया·
२५
मात्ता पित्रोः अनादरे सप्तमी· रुदित्तो विशेषणं०॥ अन्योक्ते प्रथमा·॥ अस्यार्थः अन्येउक्ते
अन्योन्क्ते· अन्योन्क्तेत स्मिन् अन्योक्ते कृत्त द्धित्त समास निपाताख्यात्तवाक्येनुक्ते प्रथमा·
परन्वयं विशेषणं· यस्मिन् प्रत्ययः स उक्तः· आख्यात प्रत्ययस्य कर्त्तरि कर्मणि विहित
त्वात्॥ कर्त्तर्य्येव प्रथमा· कर्मणि एव वा· अन्यत्र करादौ प्रसय विधानात्· सर्वषट्कारके प्रथमा·॥
त्तदुक्तो यस्मिन्नर्थे विधियत्ते त्यादित्तव्यादित्त द्धित्ताः॥ समासो वा भवे यत्र स उक्तः प्रथमात्ततः॥

स्मिंहभजे·

उक्तस्मिन्नस्यार्थस्य गृह्णान्ति संख्यां नत्याद्दयः परं॥ लिंगसंख्याविभक्तिश्च वक्तृ
त्वद्धितसमासगाः प्रकृते विकृतेर्वापि यत्रोक्तं तु द्वयोरपि॥ वाचकाः प्रकृतेः संख्यां गृह्ण
न्ति न तु विकृतेः। क्वचिन्निपातेनाभिधानं इति भाष्यं अभिधानं उक्तमित्यर्थः॥ विषव
क्षोपि संवर्ध्य स्वयं छेत्तुमसांप्रतं· अत्र विषवृक्षं इत्यर्थे निपातेनाभिधानयोगे उक्ते प्रथ
मा· असांप्रतं इत्यस्य अग्र उक्तमित्यर्थः॥ उक्ते कर्तरि प्रमाख्याते यथा कोऽपि करोति का
न्तकः इत्यादि पूर्वोक्तं बोध्यं· उक्ते कर्मणि यथा· देवदत्तेन घटः क्रियते इत्यादि· उक्ते क
र्मणि यथा· देवदत्तेन घटः कार्यः॥ रामेण सरे रावणो भिन्नः॥ इत्यादि॥ उक्ते क
योगे यथा देवदत्तेन पटः कार्यः॥ रामेण शरे रावणो भिन्नः॥ इत्यादि॥ उक्ते क
र्मोदाहरणं विभाषा विंशं कृतवान्· अत्र उक्त कृद्योगे उक्ते कर्तरि प्रथमोदाहरणं·
र्मोदाहरणं विभाषा विंशं कृतवान्· अत्र उक्तकृद्योगे उक्ते कर्तरि प्रथमोदाहरणं·
एवं उक्ते करणादौ यथा पच्यते अनेनेति पचनोग्निः दीयतेऽस्मै दानीयो विप्रः उ
पसमीपे स्थित्वा गम्यतेऽधिक्रम्यते॥ अस्मादिति उपाध्यायः पाठकः पच्यतेऽस्यां पचनि

समासे यथा॥ ग्रामं प्राप्तः आरूढवानरोत्तपक्षाः इत्यादिर्बोध्यं॥ त्याद्यः प्रत्ययाः उक्तस्यार्थ-
स्य कर्त्तुः कर्मणो वा संख्यां गृह्णन्ति न परं अनुक्तस्य यथा देवदत्ताः घटं कुर्वन्ति। इत्यत्र
उक्तस्य देवदत्तस्य बहुत्वसंख्यया क्रियापदे बहुत्वं न तु कर्मणः सापेक्षया एकत्वं यथा
च कृत्तद्धितसमासगाः प्रत्ययाः उक्तलिंगसंख्याविभक्तीः गृह्णन्ति॥ अथैषामुदाहर-
णं यथा। दर्शनीयः पुरुषः दर्शनीया नायिका। दर्शनीयं कुलं॥ औपगवः पुत्रः औप-
गवी नायिका। औपगवं कुलं। आरूढवानरो वृक्षः आरूढवानरा लता॥ आरूढवानरं वनं।
इत्यादि। यत्र प्रकृतेर्विकृतेर्वापि द्वयोरुक्तत्वं भवति तत्र वाचकाः प्रत्ययाः प्रकृतेः सं-
ख्यां गृह्णन्ति न तु विकृतेः यथा। पत्राणि पत्रावली भवन्ति अत्र पत्रसापेक्षया क्रियापदेन
त्वं। पत्रावलीसापेक्षया एकत्वं। प्रकृतिकारणं। विकृतिकार्यं कारणस्य मुख्यत्वात् प्राधान्य-
तेन पूर्वोक्तं सुस्थं प्रकृतमनुसरामः। देवदत्तेन घटः क्रियते। पटः कार्य्यः। इत्यादौ कृतोः सकार-

...रूपाः

श्री

कर्मणि यक् व्यत्ययो तेन कर्म्मणाः उक्तत्वं अतो द्वे पदे पृथग् भवतीत्यर्थः छन्दस्यादिः सर्वत्र ॥
अस्यार्थः छन्दसि वेदे सर्वत्र सर्वे स्पा विभक्तेः स्पादिर्भवतीत्यर्थः ॥ तत्र स्पादिर्यथा सि लुक्
पूर्वसवर्णः आ शे या डा ड्या या आच् आल इत्यादिः ॥ तदुक्तं सुपां सुलुक् पूर्वसवर्णा
च्छेयाडाड्यायाजालः उदाहरणं यथा दध्नाजुहोति देवदत्ताः इत्यत्र कर्मणि द्वितीयाप्राद
धीत्यर्थः अम् आदेशे मुमागमे इकारस्य अकारादेशे लोपे च रूपसिद्धिः । पूर्वं तु मां वाल
णस्य तिरित्यत्र प्रथमावहुवचनस्य जसः सि आदेशे रूपसिद्धिः । वैतिर्विरिंजु रित्यत्र
व्रजन्यः इत्यत्र प्रथमावहुवचनस्य जसो अकारेणा सह पूर्वो अकारस्य पूर्वसवर्णो क्त्र
तेन रूपसिद्धिः ॥ यद्वा सि आदेशेन न रूपसिद्धिः ॥ वावसाने इत्यनेन पदामनुवृत्तपक्षे चिदन्य
देवेत्यर्थः स्वीकृत्य अर्थामित्यनेन क्वचिदादेशीया माद्रिषु स्वरे वु भाष्येनु मसाधितः

26

इतिदिक्॥ कुल यथा॰ इयं स्वरे। सैं यथा॰ स्मे इन्द्राबृहस्पती॥ अस्मभ्यमित्यर्थे अस्मे इति नू
पं॰ अदे इत्यनेन अकारलोपः। आ यथा। सखाया॰ अत्र औस्थाने॰ आ आदेशः॥ याय
था। ऊर्णया॰ अत्र टास्थाने॥ या आदेशः। डा यथा अग्ना अग्ने जुहोति॰ अत्र ङिस्थाने
डा आदेशः। याय था॰ अवटो गोर्त्तः॥ अवटेनेत्यर्थे अवटया अत्र टा स्थाने या आदेशः
याय था॰ वाच्या भूतं॰ अत्र सि स्थाने या देशः यच्चि भ इत्यनेन भत्वात् कुत्वाभावः॥
आचू यथा॰ सुधिया॰ अत्र आमः स्थाने आचू आदेशः॥ आल यथा॰ सरस्या ङि स्थाने
आल आदेशः सुधियोर्त्यपश्च॥ चितोऽन्तोदात्तः सरस्येत्यत्र सितस्वरितः॥ कर्तृक
र्म च करणं सं प्रदानं तथैव च॥ अपादानाधिकरणं चेत्याहुः कारकाणि षट्॥
इति भायानन्दमिश्रविरचितकारकचक्रं इति समाप्तम्॥ शुभं अस्तु॥ शुभमस्तु॥

27

[OrderDescription]
,CREATED=16.10.20 14:16
,TRANSFERRED=2020/10/16 at 14:20:49
,PAGES=53
,TYPE=STD
,NAME=S0004050
,Book Name=M-919-ARKCHAKARVIRTI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF

FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF

FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,